shrI HanumadashtottarashatanAmAvalI 9

# श्रीहनुमदष्टोत्तरशतनामनामावलिः ९

## Document Information

Text title : hanumadaShTottarashatanAmAvaliH 9

File name : hanumadaShTottarashatanAmAvaliH9.itx

Category : hanumaana, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_hanumaana

Description-comments : See corresponding stotram.

Latest update : August 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# श्रीहनुमदष्टोत्तरशतनामनामावलिः ९

श्रीपराशर उवाच ।
अन्यस्तोत्रं प्रवक्ष्यामि रामप्रोक्तं महामुने ।
अष्टोत्तरशतं नाम्नां हनुमत्प्रतिपादकम् ॥

ॐ अस्य श्रीहनुमदष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य
श्रीरामचन्द्र ऋषिः ।
अनुष्टुप्छन्दः । श्रीहनुमान् देवता । मारुतात्मज इति बीजम् ।
अञ्जनासूनुरिति शक्तिः । वायुपुत्रेति कीलकम् ।
मम श्रीहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥

नमस्तस्मै हनुमते येन तीर्णो महार्णवः ।
रामलक्ष्मणसीताप्युत्तीर्णशोकमहार्णवः ॥

सप्तषष्टिर्हितां कोटि वानराणां तरस्विनाम् ।
यस्समुज्जीवयामास तं वन्दे मारुतात्मजम् ॥

यो दक्षिणां दिशं गत्वा वैदेहीं राममुद्रया ।
अजीवयत्तममृतं प्रपद्ये पवनात्मजम् ॥

इतिहासपुराणेषु प्रकीर्णानामितस्ततः ।
शतमष्टोत्तरं नाम्नां सङ्ग्रहिष्ये हनूमतः ॥

श्रीरामचन्द्र उवाच ।
ॐ आयुष्मते नमः ।
ॐ अप्रमेयात्मने नमः ।
ॐ हनुमते नमः ।
ॐ मारुतात्मजाय नमः ।
ॐ अञ्जनातनयाय नमः ।
ॐ श्रीमते नमः ।

ॐ बालार्कफलभुक्धिये नमः ।
ॐ सूर्यपृष्ठगमनाय नमः ।
ॐ पुण्याय नमः ।
ॐ सर्वशास्त्रार्थतत्त्वविदे नमः । १०
ॐ बहुश्रुतव्याकरणाय नमः ।
ॐ रामसुग्रीवसख्यकृते नमः ।
ॐ रामदासाय नमः ।
ॐ रामदूताय नमः ।
ॐ रामात्मने नमः ।
ॐ रामदैवताय नमः ।
ॐ रामभक्ताय नमः ।
ॐ रामसखाय नमः ।
ॐ रामनिधये नमः ।
ॐ रामहर्षणाय नमः । २०
ॐ महानुभावाय नमः ।
ॐ मेधाविने नमः ।
ॐ महेन्द्रगिरिमर्दनाय नमः ।
ॐ मैनाकमानिताय नमः ।
ॐ मान्याय नमः ।
ॐ महोत्साहाय नमः ।
ॐ महाबलाय नमः ।
ॐ देवमाताहृन्निवहाय नमः ।
ॐ गोष्पदीकृतवारिधये नमः ।
ॐ लङ्काद्वीपविचित्राङ्गाय नमः । ३०
ॐ सीतान्वेषणकोविदाय नमः ।
ॐ सीतादर्शनसन्तुष्टाय नमः ।
ॐ रामपत्नीप्रियंवदाय नमः ।
ॐ दशकण्ठशिरच्छेत्रे नमः ।
ॐ स्तुतताक्ष्र्याय नमः ।
ॐ अभिदर्शनाय नमः ।
ॐ धीराय नमः ।
ॐ काञ्चनवर्णाङ्गाय नमः ।

ॐ तरुणार्कनिभाय नमः ।
ॐ दीप्तानलार्चिषे नमः । ४०
ॐ द्युतिमते नमः ।
ॐ वज्रदंष्ट्राय नमः ।
ॐ नखायुधाय नमः ।
ॐ मेरुमन्दरसङ्काशाय नमः ।
ॐ विद्रुमप्रतिमाननाय नमः ।
ॐ समर्थाय नमः ।
ॐ विश्रान्ताय नमः ।
ॐ दुर्धर्षाय नमः ।
ॐ शत्रुकम्पनाय नमः ।
ॐ अशोकवनिकाच्छेत्रे नमः । ५०
ॐ वीरकिङ्करसूदनाय नमः ।
ॐ चैत्यप्रासादविध्वंसिने नमः ।
ॐ जम्बुमालीनिषूदनाय नमः ।
ॐ सीताप्रसादकाय नमः ।
ॐ शौरये नमः ।
ॐ वस्त्रलाङ्गूलपावकाय नमः ।
ॐ दग्धलङ्काय नमः ।
ॐ अप्रमेयात्मने महाजीमूतनिस्वनाय नमः ।
ॐ संस्कारसम्पन्नवचसे नमः ।
ॐ विभीषणविशोककृते नमः । ६०
ॐ मुष्टिपिष्टदशास्याङ्गाय नमः ।
ॐ लक्ष्मणोद्वाहनप्रियाय नमः ।
ॐ धूम्राक्षघ्ने नमः ।
ॐ अकम्पनघ्ने नमः ।
ॐ त्रिशिरघ्ने नमः ।
ॐ निकुम्भघ्ने नमः ।
ॐ पापराक्षससङ्घघ्नाय नमः ।
ॐ पापनाशनकीर्तनाय नमः ।
ॐ मृतसञ्जीवनाय नमः ।
ॐ योगिने नमः । ७०

ॐ विष्णुचक्रपराक्रमाय नमः ।
ॐ हस्तन्यस्तौषधिगिरये नमः ।
ॐ चतुर्वर्गफलप्रदाय नमः ।
ॐ लक्ष्मणोज्जीवनाय नमः ।
ॐ श्लाघ्याय नमः ।
ॐ लक्ष्मणार्थहृतौषधये नमः ।
ॐ दशग्रीववधोद्योगिने नमः ।
ॐ सीतानुग्रहभाजनाय नमः ।
ॐ रामं प्रत्यागताय नमः ।
ॐ दिव्याय नमः । ८०
ॐ वैदेहीदत्तभूषणाय नमः ।
ॐ रामाद्भुतयशस्तम्भाय नमः ।
ॐ यावद्रामकथास्थिताय नमः ।
ॐ निष्कल्मषाय नमः ।
ॐ ब्रह्मचारिणे नमः ।
ॐ विद्युत्सङ्घातपिङ्गलाय नमः ।
ॐ कदलीवनमध्यस्थाय नमः ।
ॐ महालक्ष्मीसमाश्रयाय नमः ।
ॐ भीमनिष्कम्पनाय नमः ।
ॐ भीमाय नमः । ९०
ॐ अव्यग्राय नमः ।
ॐ भीमसेनाग्रजाय नमः ।
ॐ युगाय नमः ।
ॐ धनञ्जयरथारूढाय नमः ।
ॐ शिवभक्ताय नमः ।
ॐ शिवप्रियाय नमः ।
ॐ चूर्णीकृताक्षदेहाय नमः ।
ॐ ज्वलिताग्निनिभाननाय नमः ।
ॐ पिङ्गाक्षाय नमः ।
ॐ विभवे नमः । १००
ॐ आक्रान्ताय नमः ।
ॐ लङ्किणीप्राणघातकाय नमः ।

ॐ पुच्छाग्निदग्धलङ्काय नमः ।
ॐ माल्यवत्प्राणहारिणे नमः ।
ॐ श्रीप्रदाय नमः ।
ॐ अनिलसूनवे नमः ।
ॐ वाग्मिने नमः ।
ॐ वानरनायकाय नमः । १०८

इत्येवं कीर्तनं यस्य नाम्नामष्टोत्तरं शतम् ।
पुण्यं पवनपुत्रस्य पावनं परिकीर्तनम् ॥
कीर्तयन् श्रावयन् शृण्वन्  आयुष्मत्तामरोगताम् ।
विष्णुभक्तिं श्रियं दीप्तिं प्राप्नोत्येव परायणः ॥
महाभयेषु युद्धेषु  चोरव्यालमृगेषु च ।
जपतां कुरुते नित्यं भगवान् पवनात्मजः ॥

॥ इति श्रीरामप्रोक्तं श्रीहनुमदष्टोत्तरशतनामावलिः सम्पूर्णा ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

*shrI HanumadashtottarashatanAmAvalI 9*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*